निलम्बत्वाच्चौरस्कौपग्रौ गुणोत्तरौ। स्निग्धत्वात् स्वादुपाकत्वात् तयोर्वापग्रा गुणोत्तराः। नादेया गुरवो मध्ये यस्मात् पुच्छास्यचारिणः। सरस्तडागजानान्तु विशेषेण शिरोलघु। अदूरगोचरा यस्मात्तस्मादुत्सोदपानजाः। किञ्चिन्मुक्त्वा शिरोदेशमत्यर्थं गुरवस्तु ते। अधस्ताद्गुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः। उरोविचरणात्तेषां पूर्वमङ्गं लघु स्मृतम्। इत्यानूपो महाभिष्यन्दिमांसवर्गो व्याख्यातः। तत्र शुष्कपूतिव्याधितविषसर्पहतदिग्धविद्धजीर्णकृशबालानामसात्म्यचारिणां मांसान्यभक्ष्याणि यस्माद्विगतव्यापन्नापहतपरिणतत्वात्संपूर्णवीर्य्यत्वाद्दोषकराणि भवन्ति। अरोचकं प्रतिश्यायं गुरु शुष्कं प्रकीर्त्तितम्। विषव्याधिहतं मृत्युं, बालं छर्दिञ्च कोपयेत्। कासश्वासकरं वृद्धं त्रिदोषं व्याधिदूषितम्। क्लिन्नमुत्क्लेशजननं कृशं वातप्रकोपणम्। एभ्योऽन्यं प्रागुपादेयं मांसमिति। स्त्रियश्चतुष्पादेषु पुमांसो विहङ्गेषु महाशरीरेष्वल्पशरीरा अल्पशरीरेषु महाशरीराः प्रधानतमा एवमेकजातीयानां महाशरीराः प्रधानतमाः। स्थानादिकृतं मांसस्य गुरुलाघवमुपदेक्ष्यामः तद्यथा—रक्तादिषु शुक्रान्तेषु धातुषूत्तरोत्तरेषु गुरुतरास्तथा सक्थिस्कन्धक्रोडशिरःपादकरकटीपृष्ठचर्म्मकालेयकयकृदन्त्राणि। शिरःस्कन्धं कटीपृष्ठं सक्थिनी चात्मपक्षयोः। गुरुपूर्वं विजानीयाद्धातवस्तु यथोत्तरम्। सर्वस्य प्राणिनो देहे मध्यो गुरुरुदाहृतः। पूर्वभागो गुरुः पुंसामधोभागस्तु योषिताम्। उरोग्रीवं विहङ्गानां विशेषेण गुरु स्मृतम्। पक्षोत्क्षेपात्समो दिष्टो मध्यभागस्तु पक्षिणाम्। अतीव रूक्षं मांसन्तु विहङ्गानां फलाशिनाम्। वृंहणं मांसमत्यर्थं खगानां पिशिताशिनाम्। मत्स्याशिनां पित्तकरं वातघ्नं धान्यचारिणाम्। जलजानूपजा ग्राम्याः क्रव्यादैकशफास्तथा। प्रसहा विलवासाश्च ये च जाङ्गलसंज्ञिताः। प्रतुदा विष्किराश्चैव लघवः स्युर्यथोत्तरम्। अल्पाभिष्यन्दिनश्चैव यथापूर्वमतोऽन्यथा। प्रमाणाधिकास्तु स्वजातौ चाल्पसारा गुरवश्च। सर्वप्राणिनां सर्वशरीरेभ्योऽपि प्रधानतमा भवन्ति यकृत्प्रदेशवर्त्तिनस्तानाददीत प्रधानलाभाभावे मध्यमवयस्कं सद्यस्कमक्लिष्टमुपादेयं मांसमिति। भवति चात्र। वयः शरीरावयवाः स्वभावो धातवः क्रियाः। लिङ्गं प्रमाणं संस्कारो मात्रा चास्मिन् परीक्षिता"।

**क्रव्यघातन** पु० क्रव्यस्य क्रव्यार्थं घात्यतेऽसौ हन–स्वार्थे णिच्–कर्म्मणि ल्युट् चतुर्थ्यर्थे ६त०। १मृगमात्रे शब्दच०। क्रव्यार्थं घातयन्ति घाति–ल्यु। मांसार्थघातके रुरुरूपे मृगभेदे "यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति" भाग० ५।२६।१५ तस्य तथात्वोक्तेः "क्रव्येण निमित्तेन मांसार्थम्" श्रीधरः

**क्रव्यभुज्** पु० क्रव्यं भुङ्क्ते भुज–क्विप्। १क्रव्यादे राक्षसे २क्रव्यादे रुरुरूपे मृगभेदे च "ससैन्धवः क्रव्यभुगेणमांसयोर्हितः ससर्पिः समधुः पुटाह्वयः" सुश्रु०। ३मांसभोक्तृमात्रे त्रि०।

**क्रव्याद्** पु० क्रव्यं मांसमत्ति अद–क्विप्। १राक्षसे २मांसाशिनि त्रि० मेदि० "क्रव्याद्गणपरीवारश्चिताग्निरिव जङ्गमः। रघुः" "क्रव्यादः व्याघ्रादयः" मल्लि० "क्रव्याद्भिश्च हतस्यान्यैः" मनुः "क्रव्याद्भिः व्याघ्रादिभिः" कुल्लू० "श्वसृगालखरैर्दृष्टो ग्राम्यैः क्रव्याद्भिरेव" मनु० च ३शवदाहके अग्निभेदे "अपाग्ने अग्निमामादं जहि निष्क्रव्यादं सेधद्वयं वा आमाद् येनेदं मनुष्याः पक्त्वाऽश्नन्ति अथ येन पुरुषं दहन्ति स क्रव्याद् एतावेवैतदुभावतोऽपहन्ति" शत० ब्रा० १।२।१।४। "हे अग्ने! गार्हपत्य! आमादमग्निमपजहि परित्यज तथा क्रव्यादमग्निं निःसेध निःशेषं दूरे गमय" वेददी० "योऽग्निं क्रव्यात् प्रविवेश यो गृहम्" ऋ० १०।१६।१० क्रव्याद्योनिप्राप्तिश्च गुरुतल्पगमनमहापातकावशेषवतां मनूक्ता यथा "तृणगुल्मलतानाञ्च क्रव्यादां दंष्ट्रिणां तथा। क्रूरकर्म्मकृताञ्चैव शतशो गुरुतल्पगः"

**क्रव्याद** पु० क्रव्यमत्ति अद-अण् उप० स०। १राक्षसे २मांसभोजिमात्रे त्रि० स्त्रियां टाप् सि०कौ०। "क्रव्यादः शवभक्षणे" विधानपा० ५०पृ० उक्ते ३वह्निभेदे।

वह्नेश्च क्रव्यादत्वं भा० आ०७अ० भृगुणा सर्वभक्षत्वे शापे अग्नये दत्ते तत्परिहारार्थं शवरूपक्रव्यादनादुक्तम् "कथं देवमुखो भूत्वा यज्ञभागाग्रभुक् तथा। हुतभुक् सर्वलोकेषु सर्वभक्षत्वमेष्यति" इत्युपक्रमे "लोकानामिह सर्वेषां त्वं कर्त्ता चान्त एव च। त्वं धारयसि लोकांस्त्रीन् क्रियाणाञ्च प्रवर्त्तकः। स तथा कुरु लोकेश! नोच्छिद्येरन् यथा क्रियाः। कस्मादेवं विमूढस्त्वमीश्वरः सन् हुताशन!। त्वं पवित्रं सदा लोके सर्वभूतगतिश्च ह। स त्वं सर्वशरीरेण सर्वभक्षत्वमेष्यसि। अपाने ह्यर्च्चिषो यास्ते सर्वं भोक्ष्यन्ति ताः शिखिन्!। क्रव्यादा